लक्ष्यं विश्वमानम्

# WEST BENGAL STATE UNIVERSITY

B.A. Honours/Programme 2nd Semester Examination, 2023

## SANHGEC02T/SANGCOR02T-SANSKRIT (GE2/DSC2)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### SECTION-A

1. अधोलिखितेषु ***पञ्चप्रश्नाः*** संस्कृतेन देवनागरीलिप्या च समाधेयाः। 2×5 = 10

(क) शुकनासः कः आसीत्? स कस्मै उपदेशं दत्तवान्?

(ख) शुकनासोपदेशानुसारेण बुद्धिः कदा कालुष्यमुपयाति?

(ग) जगति केषाम् उपदेष्टारः विरलाः? तेषां वचनं जनाः कीदृशमनुगच्छन्ति?

(घ) अनर्थपरम्परा इति पदेन किं बुध्यते?

(ङ) शुकनासोपदेशे इयम् अनार्या का? सा कस्मात् उत्थिता?

(च) शुकनासोपदेशे अनर्थपरम्परा इति पदेन किं बुध्यते?

(छ) शुकनासोपदेशस्य उत्सः कः? अस्य ग्रन्थस्य रचयिता कः?

2. अधोनिर्दिष्टं ***विषयद्वयमाश्रित्य*** टीका विरचनीया — 5×2 = 10

(i) राजलक्ष्मीः, (ii) वाडवानलः, (iii) गुरूपदेशः, (iv) मदजलम्, (v) कौटिल्यशास्त्रम्, (vi) चन्द्रापीडः।

अथवा

अधोलिखितेषु ***द्वयं*** व्याख्येयम् — 5×2 = 10

(क) यथा यथा चेयं चपला दीप्यते तथा तथा दीपशिखेव कज्जलमलिनमेव कर्म केवलमुद्वमति।

(ख) आरूढप्रतापो हि राजा त्रैलोक्यदर्शीव सिद्धदेशो भवति।

(ग) तदवस्थाश्च व्यसनशतशरव्यतामुपगता वल्मीकतृणाग्रावस्थिता जलबिन्दव इव पतितमप्यात्मानं नावगच्छन्ति।

## SECTION-B

3. ***कस्यचिदेकस्य*** प्रश्नस्य उत्तरं प्रदेयम् — 10×1 = 10

(क) शिवराजविजये उल्लिखितस्य योगिराज-चरित्रं वर्णयतु।

(ख) आधुनिकगद्यकाव्यकाररूपेण अम्बिकादत्तव्यासस्य रचनाशैली विलिख्यताम्।

4. अधोलिखितेषु ***विषयमेकमाश्रित्य*** टीका विरचनीया — 5×1 = 5

(i) यवनराज्यवृत्तान्तः, (ii) सोमनाथतीर्थः।

अथवा

***कस्यचिदेकस्य*** अनुच्छेदस्य व्याख्या कार्या — 5×1 = 5

(क) बटुरसौ आकृत्या सुन्दरः, वर्णेन गौरः जटाभिर्ब्रह्मचारी, वयसा षोडशवर्षदेशीयः, कम्बुकण्ठः, आयतललाटः, सुबाहुर्विशाललोचनश्च आसीत्।

(ख) " कार्यं वा साधयेयं देहं वा पातयेयम् " इत्यस्य सारगर्भा महती प्रतिज्ञा।

## SECTION-C

5. ***यथेच्छमेकस्य*** प्रश्नस्य उत्तरं प्रदेयम् — 10×1 = 10

(क) " दण्डिनः पदलालित्यम् "— विचार्य्यताम्।

(ख) संस्कृतगद्यसाहित्यमवलम्ब्य एकः नातिदीर्घः प्रबन्धः विरचनीयः।

6. कमपि ***एकं*** विषयमाश्रित्य टीका लिख्यताम्। 5×1 = 5

(i) वासवदत्ता, (ii) हर्षचरितम्।

अथवा

***विषयमेकमवलम्ब्य*** व्याख्या कार्या — 5×1 = 5

(क) गद्यं कवीनां निकषं वदन्ति।

(ख) आख्यायिका।

——×——

सत्यं शिवसुन्दरम्

# WEST BENGAL STATE UNIVERSITY

B.A. Honours 2nd Semester Examination, 2023

## SANACOR03T-SANSKRIT (CC3)

Time Allotted: 2 Hours — Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### SECTION-A

1. यथाभिमतं ***कस्यचिदेकस्य*** प्रश्नस्योत्तरं प्रदेयम्। 10×1 = 10

(क) को नाम चन्द्रापीडः ? मदजल-दुर्दिनान्धकार-गज-घन-घटा परिपालितापि प्रपलायते — सन्दर्भेऽस्मिन् कस्याः पलायनम् उल्लिखितम् ? शुकनासोपदेशमनुसृत्य तस्याः चरित्रं निरूप्यताम्। 1+1+8

(ख) बाणभट्टस्य काव्यप्रतिभां रचनाशैलीं चावलम्ब्य संक्षेपेण आलोचनं क्रियताम्। 10

2. अधोलिखितेषु यथेच्छं ***त्रयं*** संस्कृतभाषया देवनागरलिप्या च व्याख्येयम् — 5×3 = 15

(क) कुसुमशरप्रहारजर्जरिते हि हृदये जलमिव गलत्युपदिष्टम्।

(ख) चन्दनप्रभवो न दहति किमनलः ? किंवा प्रशमनहेतुनापि न प्रचण्डतरीभवति वडवानलो वारिणा ?

(ग) मनसा देवताध्यारोपणप्रतारणासम्भूत-सम्भावनोपहताश्च अन्तःप्रविष्टापरभूजद्वयमिवात्मबाहुयुगलं सम्भावयन्ति।

(घ) इन्द्रियहरिणहारिणी च सततमतिदुरन्तेयमुपभोगमृगतृष्णिका।

(ङ) 'आरूढ़प्रतापो हि राजा त्रैलोक्यदर्शीव सिद्धादेशो भवति' इत्येतावदभिधायोपशशाम।

अथवा

अधोनिर्दिष्टं ***विषयत्रयमाश्रित्य*** संस्कृतभाषया देवनागरलिप्या च टीकां लिखत — 5×3 = 15

(क) तिमिरान्धत्वम्; (ख) गन्धर्वनगरलेखा; (ग) कुसुमशरः; (घ) मृगतृष्णिका; (ङ) अमृतसहोदरा।

### SECTION-B

3. अधोलिखितयोः प्रश्नयोः ***कस्यचिदेकस्योत्तरं*** प्रदेयम् — 10×1 = 10

(क) कः आसीत् विहारभद्रः ? अनन्तवर्माणं प्रति विहारभद्रस्य कटूपदेशानाम् आलोचना करणीया।

(ख) भवतां पाठ्यमवलम्ब्य 'दण्डिनः पदलालित्यमि'ति विद्वद्वचनतात्पर्यं वैशद्येन विवृणुत।

4. यथेच्छं ***पञ्चप्रश्नाः*** संस्कृतभाषया देवनागरलिप्या च समाधेयाः । 2×5 = 10

(क) 'विश्रुतचरितम्' इति ग्रन्थस्य रचयिता कः ?

(ख) राजविद्याः कतिविधाः ? काश्च ताः ?

(ग) विश्रुतेन कुत्र अष्टवर्षदेशीयबालकः दृष्टः ?

(घ) कतिसंख्याकैः कैश्च फलैः बालकस्य प्राणरक्षा अभवत् ?

(ङ) कः वसुरक्षितः ? सः कमुपदिष्टवान् ?

(च) बुद्धिहीनो राजा केनाभिभूतो भूत्वा आत्मानं न जानाति ?

(छ) के तावत् षड्गुणाः ?

5. अधोलिखितेषु विषयेषु ***यथेच्छमेकमाश्रित्य*** संस्कृतभाषया देवनागरलिप्या च टीकां लिखत — 5×1 = 5

(i) पञ्चतन्त्रम् (ii) वेतालपञ्चविंशतिः (iii) पुरुषपरीक्षा।

——×——

सत्यं शिवम्सुन्दरम्

# WEST BENGAL STATE UNIVERSITY

B.A. Honours 2nd Semester Examination, 2023

## SANACOR04T-SANSKRIT (CC4)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### SECTION-A
### (Marks: 20)

1. अधोलिखितेषु *एकः* प्रश्नः समाधेयः — 10×1 = 10

(क) श्रीमद्भगवद्गीतामाश्रित्य आत्मनः स्वरूपं कर्म च वर्णनीयम्।

(ख) गुणः कः भवति ? स च कतिविधः के च ? रजोगुणस्य स्वरूपं प्रकृतिश्च व्याख्येया।

2. अधोविन्यस्तेषु *पञ्च* प्रश्नाः संस्कृतेन देवनागर्या च समाधेयाः — 2×5 = 10

(क) 'श्रीमद्भगवद्गीता' शब्दस्य निर्वचनं किम् ?

(ख) बुद्धेः परतः कः भवति ?

(ग) इन्द्रियाणि कतिविधानि ?

(घ) क्षेत्रस्य उपादानानि कानि सन्ति ?

(ङ) कथं धीरः मरणे न मुह्यति ?

(च) तमोगुणस्य फलं किम् ?

(छ) महभूतानि कानि ?

(ज) 'प्रकृतिरष्टधा' अष्टधा प्रकृतिः का अस्ति ?

### SECTION-B
### (Marks: 25)

3. अधोलिखितेषु *एकः* प्रश्नः समाधेयः — 10×1 = 10

(क) श्रीमद्भगवद्गीतामनुसृत्य ज्ञानयोगस्य प्रशस्तिः स्वभाषया वर्णनीया।

(ख) आहारः कः भवति ? स च कतिविधः के च ते ? योगसाधने आहारस्य भूमिका का भवति ?

4. अधोलिखितेषु श्लोकेषु *त्रयाणां* संस्कृतेन देवनागर्यालिप्यां च व्याख्या कार्या। 5×3 = 15

(क) किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः ।
तत् ते कर्म प्रवक्ष्यामि यज् ज्ञात्वा मोक्ष्यसेऽशुभात् ॥

(ख) यततो ह्यपि कौन्तेय पुरुषस्य विपश्चितः ।
इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः ॥

(ग) क्लैव्यं मा स्म गमः पार्थ नैतत् त्वय्युपपद्यते ।
क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तपः ॥

(घ) नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः ।
शरीरयात्रापि च ते न प्रसिध्येदकर्मणः ॥

(ङ) श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेन्द्रियः ।
ज्ञानं लब्धा परां शान्तिमचिरेणाधिगच्छति ॥

## SECTION-C
**(Marks: 5)**

5. अधोलिखितेषु **एकं** विषयमाश्रित्य संस्कृतेन देवनागर्यालिप्या च टीका लेख्याः। 5×1 = 5

(i) अनिकेतः , (ii) सर्वकर्मफलत्यागम् , (iii) श्रद्धा

———×———